## 'व्याकरणम्'

① व्याकरणस्य किं लक्षणम्?

उ: – व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति, शब्दजनकं वा व्याकरणम्।

② व्याकरणस्य अपरं नाम किम्? तस्य च वेदाङ्गेषु कथमं स्थानमस्ति?

उ – व्याकरणस्य अपरं नाम शब्दानुशासनम्। तस्य च वेदाङ्गेषु व्याकरणस्य तृतीयं स्थानमस्ति।

③ पाणिनीयव्याकरणस्य प्रतिनिधिग्रन्थः कः? तत्र कति अध्यायाः विद्यन्ते?

उ – पाणिनीयव्याकरणस्य प्रतिनिधिग्रन्थः अष्टाध्यायी। तत्र अष्टौ अध्यायाः विद्यन्ते।

④ अष्टाध्यायीसूत्राणां मूलं किमस्ति? तच्च किम्?

Ans :- अष्टाध्यायीसूत्राणां मूलं चतुर्दशमाहेश्वरसूत्राणि सन्ति। तानि च – अइउण्, ऋऌक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल्।

⑤ अष्टाध्यायी ग्रन्थस्य कोऽर्थः? अयं ग्रन्थः केन विरचितः?

Ans:- अष्टौ अध्यायाः सन्ति यस्मिन् ग्रन्थे स अष्टाध्यायीग्रन्थः। अयं ग्रन्थः महर्षिणा पाणिनिना विरचितः।

Scanned by CamScanner

(6) पाणिनेः पितुः मातुश्च नाम किम् ?

Ans:- पाणिनेः पितुः नाम पणि इत्यासीत् । अपरस्य केचन विद्वांसः शलङ्क इति कथयन्ति। मातुः नाम दाक्षी इत्यासीत् ।

(7) सूत्रस्य लक्षणं किं भवति ?

Ans:- सूत्रस्य लक्षणमस्ति —

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥

(8) पाणिनिसूत्राणां वृत्तिकाराः के सन्ति ?

Ans:- पाणिनिसूत्राणां विशदीकर्तुं कुणि - भट्टोजिदीक्षितप्रभृतयः आचार्याः वृत्तिकाराः सन्ति । वामन-जयादित्ययोः काशिकावृत्तिस्तु सुप्रसिद्धा एव ।

(9) वार्तिकस्य लक्षणं किम् ?

Ans:- वार्तिकस्य लक्षणं— उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञाः विचक्षणाः ॥

(10) भाष्यस्य किं लक्षणं भवति ?

Ans:- भाष्यस्य लक्षणं भवति —

सूत्रस्थं पदमादाय भाष्यैः सूत्रानुसारिभिः ।
स्वपदानि क्रियन्ते यत्र तद्भाष्यं भाष्यविदो विदुः ॥

(11) सूत्रकारः, वार्तिककारः भाष्यकारश्च कः ?

Ans:- सूत्रकारः पाणिनि, वार्तिककारः कात्यायनः एवञ्च भाष्यकारः पतञ्जलिः ।

Scanned by CamScanner

(12) मुनित्रयशब्देन केषां व्याकरणाचार्याणां ग्रहणं भवति ?

Ans:- पाणिनि - कात्यायन - पतञ्जलि इति त्रयाणाम् आचार्याणां ग्रहणं भवति मुनित्रयशब्देन।

(13) अष्टाध्याय्याः अपरं किं नाम ?

Ans:- अष्टाध्याय्याः अपरं नाम - शब्दानुशासनम्, काशिका, अपरञ्च अष्टक इत्यपि कथयन्ति।

(14) पाणिनीयव्याकरणस्य कति अङ्गानि भवन्ति ? कानि च तानि ?

Ans:- पाणिनीयव्याकरणस्य पञ्च अङ्गानि भवन्ति। तानि च - सूत्रपाठः, गणपाठः, धातुपाठः, उणादिपाठः, लिङ्गानुशासनम् इत्येतानि पुस्तकानि च विरचितानि पाणिनिना।

(15) पाणिनेः कतिविधानि सूत्राणि सन्ति ?

Ans:- पाणिनेः संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः अधिकारश्चेति षड्विधानि सूत्राणि सन्ति, तथा च —

'संज्ञा च परिभाषा च विधिर्नियम एव च,
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥'

(16) पाणिनिपूर्ववर्तीनां केषाञ्चित् वैयाकरणानां नामानि लिखन्तु।

Ans:- पाणिनिपूर्ववर्तिनः वैयाकरणाः तावत् आपिशलिः, काश्यपः, गालवः, शाकटायनः, शाकल्यः, सेनकः, स्फोटायनः चेति।

(17) पाणिनिपरवर्तीनां केषाञ्चित् वैयाकरणानां नामानि लिखन्तु।

Ans: पाणिनिपरवर्तिनः वैयाकरणाः तावत् भट्टोजिदीक्षितः, कौण्डभट्टः, नागेशभट्टः चेति।

Scanned by CamScanner

(18) अष्टाध्याय्याः कति पादाः विद्यन्ते ? कति सूत्राणि सन्ति ?

Ans: अष्टाध्याय्याः द्वात्रिंशत (32) पादाः विद्यन्ते।
चतुर्सहस्राणि सूत्राणि सन्ति।

Scanned by CamScanner